# आदर्श-प्रश्न-पत्रम्-2019-20

## कक्षा : दशमी

## संस्कृतम् (122)

## मॉडल पेपर-7

**समयः- होरात्रयम्** **सम्पूर्णांकाः-80**

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

| | |
|---|---|
| **खण्ड : क : अपठित-अवबोधनम्** | **10 अंकाः** |
| **खण्ड : ख : रचनात्मककार्यम्** | **15 अंकाः** |
| **खण्ड : ग : अनुप्रयुक्तव्याकरणम्** | **25 अंकाः** |
| **खण्ड : घ : पठित-अवबोधनम्** | **30 अंकाः** |

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(v) प्रश्नानाम् निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः - क 10 अंकाः

## अपठित-अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10**

जीवने सफलतायाः आधारः पुरुषार्थः एव! अस्य अभावेन नरः सुखसमृद्धिम् आप्तुम् असमर्थः भवति यशः च न प्राप्नोति! यदा यदा नरः पुरुषार्थम् अचिनोत तदा तदा तेन सफलता प्राप्ता! पुरुषार्थिनः एवम् संसारे विलक्षणप्रतिभाम् अर्जितवन्तः! अनेन एवम् ऐवरेस्टशिखरम् अजयत् अंतरिक्षं च अगच्छत्। नरः! देशसेवया समाजसेवया शिक्षाप्रसारेण च पुरुषार्थिभिः उल्लेखनीयानि कार्याणि कृतानि! अस्माकम् इतिहासे तेषां गौरवगानं विद्यते! आपत्काले येषां मनांसि विचलितानि न भवन्ति। ते एव जीवने सफलतां प्राप्नुवन्ति! पुरुषार्थिनाम् कृते तु पुरुषार्थः एव उपासना अस्ति! यः जनःस्वजीवने सफलतां प्राप्तुम् इच्छति सः पुरुषार्थः अवश्यमेवं कुर्यात्। पुरुषार्थस्य अभावे जनः सफलतां प्राप्तं न कर्तुं शक्यते।

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$
   (i) जीवने सफलतायाः आधारः किम्?
   (ii) केषां कृते पुरुषार्थः उपासना अस्ति?
   (iii) के संसारे विलक्षण प्रतिभाम् अर्जितवन्तः?
2. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$
   (i) येषां मनांसि आपत्काले विचलितानि न भवन्ति ते किं कुर्वन्ति?
   (ii) जीवने सफलतायाः आधारः कः?
   (iii) कस्य अभावे जनः सफलतां प्राप्तं न कर्तुं शक्यते?
3. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1
4. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'प्राप्नुवन्ति' इति क्रियापदस्य कर्तृपदं किम्?
   (क) पुरुथार्थी
   (ख) पुरुषार्थिनः
   (ग) ते
   (ii) 'अपयशः' इति पदस्य विपर्यपदं गद्यांशे किम् प्रयुक्तम्?
   (क) विलक्षणम्
   (ख) कार्यम्
   (ग) यशः

(iii) 'मानवः' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?
(क) सुखः
(ख) नरः
(ग) करः

(iv) 'उल्लेखनीयानि' इति पदस्य विशेष्यपदं गद्यांशे किम् प्रयुक्तम्?
(क) कृतानि
(ख) कार्याणि
(ग) पुरुषार्थः

**उत्तरम् :**

1. (i) पुरुषार्थः
(ii) पुरुषार्थिनाम्
(iii) पुरुषार्थिनः
2. (i) येषां मनांसि आपत्काले विचलितानि न भवन्ति ते एव जीवने सफलतां प्राप्नुवन्ति।
(ii) जीवने सफलतायाः आधारः पुरुषार्थः एव। अस्य अभावेन नरः सुखसमृद्धिम् आप्तुम असमर्थः भवति यशः च न प्राप्नोति।
(iii) पुरुषार्थस्य अभावे जनः सफलतां प्राप्तं न कर्तुं शक्यते।
3. **शीर्षक–** अस्य गद्यांशस्य समुचित शीर्षकं 'पुरुषार्थस्य महत्त्वं' अस्ति।
4. (i) (ग) ते
(ii) (ग) यशः
(iii) (ख) नरः
(iv) (ख) कार्याणि

## खण्डः – ख 15 अंकाः

## रचनात्मककार्यम्

**2. भवान् आदित्यः। भवतः मित्रेण रमेशेन अर्द्धवार्षिकपरीक्षायाम् आशानुरूपाः अंकाः न प्राप्ताः। नैराश्येन खिन्नं मित्रं लिखितम् इदं उत्साहप्रदं पत्रं मञ्जूषायां दत्तैः पदैः पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत।** $1/2 \times 10 = 5$

(1) ..........
दिनांकः ..........
प्रिय (2) ..........!
सस्नेहं नमो नमः। तव पत्रं मया प्राप्तम्। इदं ज्ञात्वा अतीव (3) .......... अभवम् यत् त्वया अर्द्धवार्षिक–परीक्षायाम् (4) .......... अंकाः न प्राप्ताः। अतः त्वं नैराश्येन अतीव खिन्नः दृश्यसे। परं त्वं तु न जानासि यत् (5) .......... मानवजीवनस्य आधारशिला अस्ति। मानवः आशाम् आश्रित्य (6) .......... अपि साधयति। अतः चिन्तां त्यक्त्वा धैर्यं (7) ..........। यथा नित्यं (8) .......... करोषि तथैव कुरु। अवश्यं सफलः (9) ..........। तव (10) .......... प्रतीक्षमाणः अस्मि।
तव मित्रम्
आदित्यः

| मञ्जूषा |
|---|
| आशानुरूपाः, धारय, दुःखितः, आशा, परिश्रमं, रमेश, जयपुरतः, पत्रोत्तरं, असाध्यं, भविष्यसि |

**उत्तरम् :**

(1) **जयपुरतः**
दिनांकः ..........
प्रिय (2) **रमेश!**
सस्नेहं नमो नमः। तव पत्रं मया प्राप्तम्। इदं ज्ञात्वा अतीव (3) **दुःखितः** अभवम् यत् त्वया अर्द्धवार्षिक–परीक्षायाम् (4) **आशानुरूपाः** अंका न प्राप्ताः। अतः त्वं नैराश्येन अतीव खिन्नः दृश्यसे। परं त्वं तु न जानासि यत् (5) **आशा** मानवजीवनस्य आधारशिला अस्ति। मानवः आशाम् आश्रित्य (6) **असाध्यम्** अपि साधयति। अतः चिन्तां त्यक्त्वा धैर्यं (7) **धारय**। यथा नित्यं (8) **परिश्रमं** करोषि तथैव कुरु। अवश्यं सफलः (9) **भविष्यसि**। तव (10) **पत्रोत्तरं** प्रतीक्षमाणः अस्मि।
तव मित्रम्
आदित्यः

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** $1 \times 5 = 5$



**मञ्जूषा–**उपवनम्, दोलाम्, पुष्पाणि, नारी, सूर्यः, खगाः, वृक्षः, द्वे वर्तिके, आकाशे, बालकः, बालिका, भ्रमन्ति, राजमार्गः।

**उत्तरम् :**

1. अस्मिन् चित्रे एकं उपवनं दृश्यते।
2. अत्र बालिका दोलां शोभते।
3. एका नारी भ्रमति।
4. बालकः बालिका च वृक्षस्य अधः तिष्ठति।
5. सरे द्वे वर्तिके तरतः।

अथवा

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–** $1 \times 5 = 5$

**"जीवने परिश्रमस्य महत्त्वम्"**

| |
|---|
| **मञ्जूषा–**परिश्रमेण, मनुष्यः, प्राप्नोति, जीवनस्य, आधारशिला, सुखं, विद्यां, धनं, महापुरूषाः, सफलतां, सिध्यन्ति, प्राप्नुवन्ति, कार्याणि। |

**उत्तरम् :**

**जीवने परिश्रमस्य महत्त्वम्**

परिश्रमः जीवनस्य आधारशिला अस्ति। परिश्रमेण एव मनुष्यः सफलतां प्राप्नोति सुखं च लभते। नरः अनेनैव विद्याम् आप्नोति। जनाः एतेनैव धनं प्राप्नुवन्ति। परिश्रमेण एव महापुरूषाः कार्याणि सिध्यन्ति।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्)** $1 \times 5 = 5$

1. मधुर आवाज से क्रोध शांत होता है।
   Anger pacifies by soft speech.
2. मुझे बच्चों का नाम याद नहीं है।
   I do not remember children's name.
3. पक्षी आकाश में उड़ते है।
   The birds fly in the sky.
4. पहाड़ पर पेड़ उगते है।
   The trees grow on the mountain.
5. हम पेड़ की छाया में बैठेंगे।
   We will sit in the shadow of the tree.
6. अगर मैं काशी जाऊंगा तो संस्कृत की कई किताबे लाउंगा।
   If I will go to Kashi I will bring many books of Sanskrit.
7. आपको यह किसने बताया?
   Who told you this?

**उत्तरम् :**

1. मृदुवाचा क्रोधः शाम्यति।
2. बालकानां नामानि अहं न स्मरामि।/बालकानां नामानि मया न स्मर्यन्ते।
3. विहगाः/खगाः आकाशे/गगने डयन्ते/उड्डयन्ते।
4. वृक्षाः/पादपाः पर्वते/अचले रोहन्ति।
5. वयं वृक्षस्य छायायाम् उपवेक्ष्यामः/उपविशेम।
6. यदि अहं काशीं गमिष्यामि तर्हि बहूनि संस्कृतपुस्तकानि आनेष्यामि।
7. तुभ्यं केन कथितमेतद्?

**खण्डः ग** **25 अंकाः**

## अनुप्रयुक्तव्याकरणम्

**5. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. उद्याने बालकः इतः + ततः पश्यति।
   **उत्तरम् :** इतस्ततः
2. तेन सह श्यामः + अपि पठति।
   **उत्तरम् :** श्यामोऽपि
3. अन्ये छात्राः + अपि तत्र क्रीडन्ति।
   **उत्तरम् :** छात्रा अपि
4. सोऽपि मया सह गमिष्यति।
   **उत्तरम् :** सः + अपि
5. अहो! तत्र क्रीडितुम् भानुरपि आगच्छति।
   **उत्तरम् :** भानुः + अपि

**6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. अये! कथं कथं श्रीकृष्णार्जुनौ युधिष्ठिरः च।
   (क) श्रीकृष्णौ अर्जुनौ च
   (ख) श्रीकृष्णः च अर्जुनः च
   (ग) श्रीकृष्णम् अर्जुनं च
   **उत्तरम् :** (ख) श्रीकृष्णः च अर्जुनः च
2. सर्वेषामपि महत्त्वं विद्यते यथासमयम्।
   (क) समयानुसारेण
   (ख) यथासमयात्
   (ग) समयम् अनतिक्रम्य
   **उत्तरम् :** (ग) समयम् अनतिक्रम्य
3. वयं राजभवनं परित्यत्य वनं गच्छामः।
   (क) राज्ञा भवनम्
   (ख) राज्ञे भवनम्
   (ग) राज्ञः भवनम्
   **उत्तरम् :** (ग) राज्ञः भवनम्
4. शिशिरवसन्तौ पुनरायातः।
   (क) शिशिरस्य वसन्तः
   (ख) शिशिरौ च वसन्तौ च
   (ग) शिशिरः च वसन्तः च
   **उत्तरम् :** (ग) शिशिरः च वसन्तः च
5. बालाः उपवृक्षं क्रीडन्ति।
   (क) वृक्षस्य समीपम्
   (ख) वृक्षं वृक्षं प्रति

(ग) वृक्षात् दूरम्

**उत्तरम् :** (क) वृक्षस्य समीपम्

**7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. श्रद्धा+मतुप् ज्ञानं लभते।
   (क) श्रद्धावान्
   (ख) शृद्धवानम्
   (ग) श्रद्धायामं

**उत्तरम् :** (क) श्रद्धावान्

2. किं मरणम्? मूर्खत्वम्।
   (क) मूर्ख + त्व
   (ख) मूर्ख + त्वम्
   (ग) मूर्ख + शतृ

**उत्तरम् :** (क) मूर्ख + त्व

3. एषा बाला श्रेष्ठा गायक + टाप् अस्ति।
   (क) गायका
   (ख) गायिका
   (ग) गायकी

**उत्तरम् :** (ख) गायिका

4. एषा मम पुत्र+ङीप् क्रीडति।
   (क) पुत्रा
   (ख) पुत्री
   (ग) पुत्रीम्।

**उत्तरम् :** (ख) पुत्री

5. सदैव सुबालकैः सह मित्र + तल् करणीया।
   (क) मित्रम्
   (ख) मित्रतया
   (ग) मित्रता

**उत्तरम् :** (ग) मित्रता

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत-** $1 \times 3 = 3$

रामः- मित्र! सम्प्रति त्वं किं लिखसि?
श्यामः- बन्धो! मया सम्प्रति पत्रं (1) ..........।
रामः- किम् त्वया (2) .......... अपि पठयन्ते?
श्यामः- आम् अहं पुस्तकानि अपि (3) ..........।
रामः- मित्र! एतत् चित्रम् कः करोति?
श्यामः- एतत् चित्रम् मया एव क्रियते।

| **मञ्जूषा** |
|---|
| पुस्तकानि, पठामि, लिख्यते। |

**उत्तरम् :**

(1) लिख्यते, (2) पुस्तकानि, (3) पठामि।

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत (केवलं त्रयाणाम्)-**

1. रामः रावणं हन्ति।
2. न परिचयं रक्षति।
3. सः ग्रन्थम् लिखति।
4. न शीलं पश्यति।
5. अहं ग्रामं गच्छामि।

**उत्तरम् :**

1. रामेण रावणः हन्यते।
2. न परिचयः रक्ष्यते।
3. तेन ग्रन्थः लिख्यते।
4 न शीलं दृश्यते।
5. मया ग्रामं गम्यते।

**9. कालबोधकशब्दैः अधोलिखित- दिनचर्यां वा पूरयत- (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. प्रातः 7.30 .......... वादने प्रार्थना-सभा अस्ति।
2. प्रातः 10.00 ......... अर्द्धावकाशः भवति।
3. मध्याह्ने 11.45 .......... वादने विविधाः क्रीडाः आयोज्यन्ते।
4. मध्याह्ने 1.15 ........ वादने पूर्णावकाशः भवति।
5. 1:30 ......... वादने गृहं गच्छति।

**उत्तरम् :**

1. सार्द्धसप्त
2. दश
3. पादोनद्वादश
4. सपादएक
5. सार्धैक

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नषटकम्)** $1/2 \times 6 = 3$

1. जननी जन्म भूमिश्च स्वर्गाद् .......... गरीयसी।
2. त्वया ......... कोलाहलं परित्यज्य सुप्तव्यम्।
3. वर्षायां मेघाः ......... गर्जन्ति।
4. प्रातः उद्याने ......... न चलितव्यम्।
5. तदैव तौ श्रुत्वा .......... काकः प्रविशति।
6. .......... अहम् भ्रमणाय गमिष्यामि।
7. समुद्रेषु वृष्टिः ..........।
8. पश्य वानराः वृक्षेषु ......... कूर्दन्ति।

| **मञ्जूषा** |
|---|
| अधुना, उच्चैः, सहसा, अपि, शनैः, वृथा, इतस्ततः इदानीम्। |

**उत्तरम् :**

1. अपि
2. अधुना
3. उच्चैः
4. शनैः
5. सहसा
6. इदानीम्
7. वृथा
8. इतस्ततः

**11.अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. विद्वान विदेशेषु अपि पूजयन्ते। (पूज्यते/पूजते/पूज्येते)
2. अहं स्वकर्मं सदा निष्ठया करोमि। (स्वकर्माणि/स्वकर्म/स्वकर्मः)
3. त्वं कुत्र गच्छामि? (गच्छसि/गच्छतः/गच्छथः)
4. उद्याने अनेकाः जनाः व्यायामं कुर्वन्ति। (अनेको/अनेके/अनेकानि)

**उत्तरम् :**

1. पूज्यते
2. स्वकर्माणि
3. गच्छसि
4. अनेके

## खण्डः – घ 30 अंकाः

## पठित–अवबोधनम्

**12.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** 5

भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जाननपि कृषकः तं बहुधा पीड़यति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न? इति प्रत्यवोचत्। "भद्रे! नूनम्। सहस्राधिकेषु पुत्रेशु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?" इति इंद्रेण पृष्टा सुरभिः प्रत्यवोचत्।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) पुत्रस्य दैन्यं दृष्ट्वा का रोदिति?
   (ii) तस्य दीनतां जानानपि कः तं बहुधा पीडयति?
   (iii) इन्द्रेण पृष्टा का प्रत्यवोचत्?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) वृषभः केन भारं उद्वहति?
   (ii) भो वासव! अस्मिन् पदे वासवः कः?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'शक्रेण' इति पदस्य पर्यायपदं गद्यांशे किं?
   (क) इन्द्रेण
   (ख) वृषभेन
   (ग) दीनेन
   (ii) 'एतत् भवान् पश्यति' अत्र किं क्रियापदं?
   (क) गच्छति
   (ख) इति
   (ग) पश्यति
   (iii) 'हसामि' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?
   (क) सत्वपि
   (ख) रोदिमि
   (ग) अस्मिन्
   (iv) "सः कृच्छ्रेण भारमुद्वहति" अत्र कर्तृपदं किम्?
   (क) कृषकः
   (ख) वृषभः
   (ग) इन्द्रः

**उत्तरम् :**

1. (i) सुरभि
   (ii) कृषकः
   (iii) सुरभिः
2. (i) वृषभः कृच्छ्रेण भारं उद्वहति।
   (ii) अस्मिन् पदे वासवः "इन्द्रः" अस्ति।
3. (i) (क) इन्द्रेण
   (ii) (ग) पश्यति
   (iii) (ख) रोदिमि
   (iv) (क) कृषकः

**13.अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** 5

वायुमंडलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्।
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्।
शुचि ..........।।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) कीदृशं भक्ष्यं अस्ति?
   (ii) कीदृशं जलं नास्ति?
   (iii) समलं किमस्ति?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) कीदृशं वायुमण्डलम्।
   (ii) बहुशुद्धिकरणम् कुत्र करणीयम्?
3. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'वारि' इति पदस्य पर्यायपदं श्लोके किं प्रयुक्तम्?
   (क) भक्ष्यं
   (ख) जलं
   (ग) निर्मलं
   (ii) 'अभक्ष्यं' इत्यस्य विलोमपदं श्लोके किं प्रयुक्तम्?

(क) दूषितं

(ख) भृशं

(ग) भक्ष्यं

(iii) 'बहु शुद्धीकरणम्' इत्यस्य क्रियापदं श्लोके किम्?

(क) धरातलम्

(ख) करणीयम्

(ग) समतलम्

(iv) "निर्मल जलम्" अनयोः पदयोः विशेष्य पदं किम्?

(क) निर्मलं

(ख) जलम्

(ग) धरातलम्

**उत्तरम् :**

1. (i) कुत्सितवस्तुमिश्रितं
   (ii) निर्मलं
   (iii) धरातलम्
2. (i) भृशं दूषितं वायुमण्डलम्।
   (ii) बहुशुद्धिकरणम् बहिरन्तर्जगति करणीयम्।
3. (i) (ख) जलं
   (ii) (ग) भक्ष्यं
   (iii) (ख) करणीयम्
   (iv) (ख) जलम्

**14. अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

चाणक्यः वत्स! मणिकार श्रेष्ठिनं चंदनदासमिदानीं द्रष्टुमिच्छामि।

शिष्यः तथेति (निष्क्रम्य चंदनदासेन सह प्रविश्य) इतः इतः श्रेष्ठिन्! (उभौ परिक्रामतः)

शिष्यः (उपसृत्य) उपाध्याय! अयं श्रेष्ठी चंदनदासः।

चंदनदासः जयत्वार्यः

चाणक्यः श्रेष्ठिन्! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः?

चंदनदासः (आत्मगतम्) अत्यादरः शंकनीयः। (प्रकाशम्) अथ किम्। आर्यस्य प्रसादेन अखंडिता मे वणिज्या।

चाणक्यः भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

चंदनदासः आज्ञापयतु आर्यः, किं कियत् च अस्मज्जनादिष्यते इति।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) चंदनदासं द्रष्टुं कः इच्छति?
   (ii) कीदृशः अत्यादरः?
   (iii) 'जयत्वार्थः' इति कः कथयति?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) मणिकार श्रेष्ठी कः आसीत्?
   (ii) कः शंकनीयः भवति?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'स्वगतम्' इति पदस्य पर्यायपदं नाट्यांशे किं प्रयुक्तम्?
      (क) आत्मगतम्
      (ख) स्वगतम्
      (ग) वत्स
   (ii) 'अनादरः' इति पदस्य विलोमपदं किम्?
      (क) श्रेष्ठिनं
      (ख) आदरः
      (ग) उपसृत्य
   (iii) 'अखण्डिता वणिज्या' अत्र विशेषण पदं किम्?
      (क) अखण्डिता
      (ख) खण्डिता
      (ग) प्रीताभ्य
   (iv) 'मणिकार श्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि' अस्मिन् वाक्ये क्रियापदं किम्?
      (क) इच्छामि
      (ख) द्रष्टुं
      (ग) श्रेष्ठिनं

**उत्तरम् :**

1. (i) चाणक्यः
   (ii) शंकनीयः
   (iii) चन्दनदासः
2. (i) मणिकार श्रेष्ठी चन्दनदासः आसीत्।
   (ii) अत्यादरः शंकनीयः भवति।
3. (i) (क) आत्मगतम्
   (ii) (ख) आदरः
   (iii) (क) अखण्डिता
   (iv) (क) इच्छामि

**15. रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत– (केवलं प्रश्नचतुष्टयम्) $1 \times 4 = 4$**

1. पिता बाल्ये पुत्राय <u>विद्याधनं</u> यच्छति।
2. <u>अस्य</u> पिता तपः तेपे।
3. चित्ते वाचि च <u>अवक्रता</u> भवेत्।
4. तदेव <u>महात्मानः</u> समत्वं कथयन्ति।
5. मूर्खजनः धर्मप्रदां वाचं त्यक्त्वा <u>परुषां</u> वदति।

**उत्तरम् :**

1. पिता बाल्ये पुत्राय किं यच्छति?
2. कस्य पिता तपः तेपे?
3. चित्ते वाचि च का भवेत्?
4. तदेव के समत्वं कथयन्ति?
5. मूर्खजनः धर्मप्रदां वाचं त्यक्त्वा कां वदति?

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत-** $1/2 \times 4 = 2$

I. विनिपातो न वः कश्चिद् दृश्यते त्रिदशाधिपः।
अहं तु पुत्रं शोचामि, तेन रोदिमि कौशिक!।।

**अन्वयः-** त्रिदशाधिपः वः (1) .......... विनिपातः न (2) ..........। कौशिक! अहं तु (3) .......... शोचामि, तेन (4) ..........।

II. व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम्।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः।। $1/2 \times 4 = 2$

**अन्वयः-** व्यायामः (1) .......... स्निग्धभोजिनां हि सदा (2) ..........। स च शीते (3) .......... च तेषां (4) .......... स्मृतः।

| मञ्जूषा |
|---|
| दृश्यते, कश्चिद्, रोदिमि, पुत्रं, वसन्ते, बलिनां, पथ्यतमः, पथ्यः। |

**उत्तरम् :**

**अन्वयः** I (1) कश्चिद्, (2) दृश्यते, (3) पुत्रं, (4) रोदिमि।

**अन्वयः** II (1) बलिनां, (2) पथ्यः, (3) वसन्ते, (4) पथ्यतमः।

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-** $1 \times 4 = 4$

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।

**भावार्थः**-मूढः पुरुषः एक .......... (सत्यां मधुरां च) वाणीं परित्यज्य कठोरां वाणीं वदति, वस्तुतः सः .......... पक्वं फलं .......... अपक्वं फल मेव खादति। बुद्धिमान् तु सदैव सत्यां मधुरां च .......... वदति।

| मञ्जूषा- मन्दमतिः, त्यक्त्वा, धर्मप्रदां, वाणीं |
|---|

**उत्तरम् :**

**भावार्थः-** मूढः पुरुषः एक **धर्मप्रदां** (सत्यां मधुरां च) वाणीं परित्यज्य कठोरां वाणीं वदति, वस्तुतः सः **मन्दमतिः** पक्वं फलं **त्यक्त्वा** अपक्वं फलमेव खादति। बुद्धिमान् तु सदैव सत्यां मधुरां च **वाणीं** वदति।

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत-** $1/2 \times 8 = 4$

1. शवः प्रावारकमपसार्थ सर्व वृत्तान्तं निवेदितवान्।
2. विचित्रयुक्त्या न्यायाधीशः निर्णयं कृत्वा तं जनं ससम्मानं मुक्तवान्।
3. पार्श्वस्थिते ग्रामे करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।
4. सर्वं वृत्तमवगत्य न्यायाधीशः तं निर्दोषम् अमन्यत् आरक्षिणं च दोषी।
5. काश्चन चौरः रात्रौ तस्मिन् गृहे प्रविश्य मञ्जूषामेकां आदाय पलायितः।
6. ग्रामवासिनः वराकमतिथिमेव चौरं मत्वाऽभर्त्सयन्।
7. निर्धनः जनः सायं समयेऽपि गन्तव्याद् दूरे आसीत्।
8. रात्रौ विजने प्रदेशे पदयात्रा न शुभावहा।

**उत्तरम् :**

1. निर्धनः जनः सायं समयेऽपि गन्तव्याद् दूरे आसीत्।
2. रात्रौ विजने प्रदेशे पदयात्रा न शुभावहा।
3. पार्श्वस्थिते ग्रामे करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।
4. काश्चन चौरः रात्रौ तस्मिन् गृहे प्रविश्य मञ्जूषामेकां आदाय पलायितः।
5. ग्रामवासिनः वराकमतिथिमेव चौरं मत्वाऽभर्त्सयन्।
6. सर्वं वृत्तमवगत्य न्यायाधीशः तं निर्दोषम् अमन्यत् आरक्षिणं च दोषी।
7. शवः प्रावारकमपसार्थ सर्व वृत्तान्तं निवेदितवान्।
8. विचित्रयुक्त्या न्यायाधीशः निर्णयं कृत्वा तं जनं ससम्मानं मुक्तवान्।

**18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत-** $1 \times 3 = 3$

(केवलं प्रश्नत्रयम्)

| क | ख |
|---|---|
| विभज्य | आक्षेपं कुर्वन्ती |
| व्याघ्रमारी | विभक्तं कृत्वा |
| भामिनी | रूपवती स्त्री |
| आक्षिपन्ती | शार्दूलहन्त्री |

**उत्तरम् :**

| | | |
|---|---|---|
| विभज्य | = | विभक्तं कृत्वा |
| व्याघ्रमारी | = | शार्दूलहन्त्री |
| भामिनी | = | रूपवती स्त्री |
| आक्षिपन्ती | = | आक्षेपं कुर्वन्ती |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियं राजानः इच्छन्ति।
(क) प्रसन्नाभ्यः
(ख)प्रष्टव्याः
(ग) प्रष्टुं योग्याः

**उत्तरम् :** (क) प्रसन्नाभ्यः

2. संव्यवहाराणाम् वृद्धिलाभाः प्रचीयन्ते।
(क) तृणानाम्
(ख)व्यापाराणाम्
(ग) पौराणाम्

**उत्तरम् :** (ख) व्यापाराणाम्

3. लवकुशयोः एकमेव प्रतिवचनम् आसीत्।

    (क) उत्तरम्

    (ख)अध्यासितुम्

    (ग) उपवेष्टुम्

    **उत्तरम् :** (क) उत्तरम्

4. रात्रौ हिमकरः शोभते।

    (क) तारकं

    (ख) सूर्यः

    (ग) चन्द्रः

    **उत्तरम् :** (ग) चन्द्रः

WWW.CBSE.ONLINE

Download unsolved version of this paper from
www.cbse.online

This sample paper has been released by website www.cbse.online for the benefits of the students. This paper has been prepared by subject expert with the consultation of many other expert and paper is fully based on the exam pattern for 2019-2020. Please note that website www.cbse.online is not affiliated to Central board of Secondary Education, Delhi in any manner. The aim of website is to provide free study material to the students.